अपशूद्राधिकरणम्

Dr.K.Vishnu Namboodiri
Professor,Dept.of Vyakarana, Sree Sankaracharya University of Sanskrit,Kalady.

Submitted on: 04/08/2019 Revised on: 10/08/2019 Accepted on: 15/08/2019

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठती-त्यादिश्रुतिवाक्ये अङ्गुष्ठमात्रः पुरुषः परमात्मैवेति बादरायणप्रणीतेषु शारीरकमीमांसासूत्रेषु प्रमिताधिकरणे निर्णीतम्। तत्र सर्वगतस्य परमात्मनः कथं परिमाणोपदेश इत्याशङ्क्य , यतो मनुष्यानधिकृत्य परब्रह्मप्रतिपादनपरस्य वेदस्य प्रवृत्तिः अतस्तदीयहृदयेवस्थानमपेक्ष्याङ्गुष्ठमात्रत्व मुपदिष्टमिति समाहितं – हृद्यपेक्षया तु मनुष्याधिकारत्वात्(1.3.25)- इति सूत्रेण॥ यदि ब्रह्मप्रतिपादनपरे शास्त्रे मनुष्याणामधिकार इत्युच्यते तर्हि ये अमनुष्या देवादयः तेषां ब्रह्मविद्यायां नाधिकारः इत्यापद्यते। सा शङ्का -तदुपर्यपि बादरायणः सम्भवात् (1.3.26) -इति सूत्रेण निरासि। तदुत्तरत्र- मध्वादिष्वसम्भवादनधिकारं जैमिनिः(1.3.31)-इति सूत्रेण देवादीनां ब्रह्मविद्यायां नास्त्यधिकार इत्येव जैमिनेर्मतमिति प्रदर्श्य- भावं तु बादरायणोस्ति हि(1.3.33)–इति सूत्रेण देवानप्यधिकरोति ब्रह्मविद्येति प्रत्यपादयत् सूत्रकारः॥ ब्रह्मविद्याप्रतिपादके शास्त्रे मनुष्याणामधिकारश्चेत् शूद्राणापि स स्यात् इति प्राप्ते शूद्राणां ब्रह्मविद्यायां नाधिकार इति विशेषेण प्रपञ्चयामास बादरायणः पञ्चभिः सूत्रैः-

1.शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि(1.3.34)

2.क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्(1.3.35)

3.संस्कारपरामर्शात् तदभावाभिलापाच्च(1.3.36)

4.तदभावनिर्धारणे च प्रवृत्तेः(1.3.37)

5.श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च(1.3.38) - इति।

तदेतत् सूत्रपञ्चकम् अपशूद्राधिकरणमिति प्रसिद्धम्। इदञ्चाधिकरणं यथावत् सङ्गत्यादिप्रदर्शनपूर्वकं शङ्कराचार्यरामानुजाचार्यमध्वाचार्यादिभिः सर्वैरपि भाष्यकारैः व्याख्यातम्॥ प्रबन्धस्यास्य ब्रह्मविद्याधिकारविचारणायां न तात्पर्यम्। किन्तु -अपशूद्राधिकरणवशाद् शङ्कराचार्ये यः पङ्क आधुनिकैरुद्भावितः स स्थाने वेत्यालोचनमत्र विधीयते॥

आधुनिकानां पण्डितानामाक्षेपस्य सारांशः-

जातिशूद्राणां नास्ति ब्रह्मविद्यायामधिकार इत्यपशूद्राधिकरणे शङ्कराचार्यः सिद्धान्तित वान्। ब्राह्मणः-शूद्र इति भेदभावना, तत्रापि उच्चनीचत्वकल्पना – एतत्सर्वम् अद्वैतभावनायाः कटकविरुद्धमिति

प्रत्यक्षसिद्धम्। तत् कथं शङ्करः सर्वमानवकल्याणेच्छुश्चेत् ब्राह्मणमतपक्षपाती सन् शूद्राणां ब्रह्मविद्यास्वधिकारं तिरस्कुर्यात्। तस्मात् जातिसैद्धान्तिको वरेण्यवर्गाधीनसाम्राज्यप्रतिष्ठापनाचार्य एवाचार्यशङ्करः।–इति॥

अपशूद्राधिकरणे पूर्वपक्षः -

शूद्रस्य ब्रह्मविद्यायामधिकारोस्तीति पूर्वपक्षः, नास्तीति सिद्धान्तपक्षः। सिद्धान्तपक्ष एव च पञ्चसु सूत्रेषु कृतः। पूर्वपक्षस्तु तदनुरोधेन भाष्यकृद्भिः कल्प्यते। तथाहि- तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि अस्य शुक्, उत्तरत्र चैत्ररथेन लिङ्गात् क्षत्रियत्वगतेश्च, संस्कारपरामर्शात् तदभावाभिलापाच्च, तदभावनिर्धारणे प्रवृत्तेश्च, स्मृतेः श्रवणाध्ययनार्थप्रतिषेधाच्च - इति अधिकरणेस्मिन् पदानामन्वयं स्वीकृत्य - तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तम्, अर्थित्वसामर्थ्ययोः सम्भवात्। तस्माच्छूद्रो यज्ञेनवक्लृप्तः इतिवत् शूद्रो विद्यायामनवक्लृप्तः इति निषेधाश्रवणात्।..संवर्गविद्यायां हि जानश्रुतिं शूद्रशब्देन परामृशति-अह हारे त्वा शूद्र तवैव सह गोभिरस्तु -इति। विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसम्पन्नाः स्मर्यन्ते। तस्मादधिक्रियते शूद्रो विद्यासु। - इति पूर्वपक्ष आरचितः शङ्करेण॥

अधिकरणस्यानधिकारस्थापनपरत्वे युक्तत्वविचारः-

छान्दोग्योपनिषदि संवर्गविद्यासन्दर्भे यज्जानश्रुतिं रैक्वः शूद्रेत्याह्वयत् तत्र शूद्रशब्दो यौगिको, न रूढः,- इत्याशयः प्रथमसूत्रस्य। जानश्रुतेः शूद्रत्वं सन्दिह्य परिहरता सूत्रकारेण शूद्रस्य ब्रह्मविद्यायामनधिकार एव सिद्धान्त्यते। तथाच–अनधिकारं शूद्रस्य- इत्येतादृशं स्पष्टं वाक्यं विनापि ब्रह्मविद्यायामनधिकारं शूद्रस्य सिद्धान्तयदेवेदं सूत्रमिति स्पष्टम्। अतः - भावं तु बादरायणोस्ति हि(1.3.33) इति पूर्वसूत्रसाहचर्येण अधिकारभावपरतया सूत्रं व्याख्यातुं न शक्यते। तथा सति योगाश्रयणस्य वैयर्थ्यात्। रूढित्यागे योगाश्रयणे च मानं द्वितीयसूत्रेण दर्शितम्। शूद्रेत्याह्वाने सत्यपि प्रकरणपर्यालोचनायां तु जानश्रुतिः क्षत्रिय इत्यस्यैव लाभात् शूद्रेत्यत्र योग एवाश्रयणीय इति॥

ननु भावं तु बादरायणोस्ति हि(1.3.33)- इति पूर्वसूत्रसाहचर्यात् अधिकारभावः एव पञ्चसूत्र्या अस्या विषय इति कुतो भवितुं नार्हति।तथाहि- अनधिकारसाधनपरं प्रथमसूत्रद्वयं पूर्वपक्षः। तदुत्तरसूत्रद्वयं सिद्धान्त इत्यस्तु। तथाहि-तृतीयचतुर्थसूत्रयोरेवमर्थोस्तु- संस्कारपरामर्शात् तदभावाभिलापाच्च तदभावनिर्धारणे च प्रवृत्तेरित्येकं वाक्यम्। विद्याप्रदेशेषु उपनयनादयः संस्काराः परामृश्यन्ते-तं होपनिन्ये इत्यादि। तदभावश्च क्वचित् अभिलप्यते – तान् ह अनुपनीयैव- इत्यादि। अथवा - न च संस्कारमर्हति इत्यादिना स्मृतिषु शूद्रस्य संस्काराभावोभिलप्यते। तथाच जातिब्राह्मणत्वाभावे निर्धारिते न प्रवर्तितव्यमुपदेशे, अथापि सत्यवादित्वरूपं ब्राह्मण्यमाश्रित्य विद्योपदेशे गौतमो यत् प्रववृते ततो ब्रह्मविद्यायां ब्राह्मणगुणविशिष्टस्य शूद्रस्याप्यधिकारोस्ति हि।-इति तृतीयचतुर्थे सूत्रे अधिकारसाधनपरे स्याताम् -इति चेन्न। श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च-इति पञ्चमसूत्रस्य अधिकारसाधनपरतया कथमपि योजयितुमशक्यत्वात्। तस्मात् पञ्चसूत्र्या शूद्रस्याधिकाराभाव

एव वर्ण्यते बादरायणेन-इत्येव युक्तमास्थातुम्।।

यदि सूत्रानारूढोर्थः कश्चित् भाष्यकारेणोन्नीतः तर्हि आधुनिकपण्डितैः कृतः सर्वोपि आक्षेपः स्थाने। परन्तु सूत्रारूढ एवार्थः शङ्करार्चार्येण भाष्ये विवृतः। सूत्रार्थयोजने स्थलान्तरे अप्रदर्शिता का त्वरा शूद्राणामनधिकारं स्थापयितुमत्र आचार्येण प्रदर्शिता इति न विद्मः। किञ्च रामानुजाचार्येण मध्वाचार्येण वा शङ्करसिद्धान्तान् सर्वत्र निराचक्रुषा नात्र भिन्नः कोपि भवत्प्रशंसार्ह आशय उन्नीतः। एवं स्थिते कथमयं पङ्कः शङ्करे सङ्गच्छते।।

अधिकारो नाम कः-

अर्थित्वं सामर्थ्यम् अप्रतिषेधः- इति त्रितयं समुदितम् अधिकारः। तत्रार्थित्वं शूद्रस्यापि सम्भवति। सामर्थ्यं हि लौकिकं शास्त्रीयञ्चेति द्विविधम्। तत्र लौकिकं शूद्रस्य सम्भवति। उपनयनवेदाध्ययनादिषु तु शूद्रस्य प्रतिषेधोस्ति स्मृतिषु। अर्थित्वसामर्थ्ययोः सद्भावेपि न सर्वः सर्वत्राधिक्रियते आधिनिके कालेपि। तत्तत्कालेषु प्रमाणपदवीमारूढायाः तत्तत्स्मृतेरनुग्रहे सत्येवार्थित्वसामर्थ्ययोः सतोरपि तत्र तत्राधिकारो लभ्यते। लौकिकसामर्थ्यवानपि कश्चिदर्थी तत्तत्स्मृतिप्रतिषिद्धे वयआधिक्यादिमत्वे अनधिकारी कल्प्यते।। तस्मादप्रतिषेधोप्यधिकारसम्पादक एव। यत्रोभयमस्ति तत्र तु अप्रतिषेधः प्रयत्नेनापि सम्पाद्यः, न तु स्मृत्युल्लङ्घनं श्रेयः।।

सूत्रभाष्यकृतोः कुत्र निर्भरः -

स्मृत्यनुल्लङ्घने एव सूत्रभाष्यकृतोः निर्भरः। न तु शूद्रस्य ब्रह्मविद्याधिकारनिषेधे-इति द्रष्टुं शक्यते। श्रुतिस्मृतिप्रमाणकतयैव सूत्रभाष्ये प्रवर्तेते। स्वमतस्थापने परमतखण्डने, सर्वत्र च अर्थे, ते एव शारीरकमीमांसायां प्रमाणे आस्थिते। अपशूद्रत्वेपि कथञ्चित् श्रुतिवाक्यं शूद्रानुकूलतया समन्वाययितुं शक्यते वा -इत्येवान्विष्टं सूत्रकृता। तदिदं – स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा इति भारतमाख्यानं कृपया मुनिना कृतम्- इत्यादिपुराणोक्तिपर्यालोचनया निर्मत्सराणां स्पष्टम्। -यदि युष्माकं वेदः तेषां दूरे तर्हि पञ्चमोयं तद्गोचरोन्य एव वेदः प्रणीतो मयेति- सर्वान् प्रति कारुणिकस्य व्यासस्य भावः।।

यथा जानश्रुतौ गौणं शूद्रत्वम् एवं सत्यकामजाबालेपि सत्यवादित्वरूपं गौणं ब्राह्मण्यमित्यपि भवितुमर्हति। तदभावनिर्धारणे च प्रवृत्तेः इत्यनेन शुद्धशूद्रत्वाभावनिर्धारणे च प्रवृत्तेः –इत्यपि सूचितम्। सर्वमिदमब्रुवता बादरायणेनोक्तं निर्मत्सरश्रवणगोचरम्।।

भाष्यकृच्चाधिकरणान्ते- येषां पुनः पूर्वकृतसंस्कारवशात् विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिः तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुम्, ज्ञानस्यैकान्तिकफलत्वात्। श्रावयेच्चतुरो वर्णान् इति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात्। वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणाम् इति स्थितम्- इति गूढं स्मयमानः सर्वेषां प्राप्तपाकानां ब्रह्मज्ञानेधिकारोस्त्येवेत्येवानुमेने, न प्रतिषेधम्। किं हि वेदपूर्वकत्वाख्येन विशेषणेन ब्रह्मविद्यां शुद्धां प्रेप्सताम्।।

सहायकग्रन्था:

1. ब्रह्मसूत्रशङ्करभाष्यम् रत्नप्रभा टीका
2. छान्दोग्योपनिषद्
3. बृहदारण्यकोपनिषद्
4. भामतीटीका
5. BrahmasutraSankarabhashyaWithRatnaprabaVolume1-RamanarayanaVidyaratna1863
6. Brihadaranyaka Upanishad WithSankaraBhashyaTika-Roer- 1849.